## ।। द्विषष्टितमोऽध्यायः ।। Chapter-62

वसिष्ठ उवाच :- ततो गच्छेत् महाराज कमलं तीर्थमुत्तमम् ।।
यत्र पद्माद्विनिष्क्रान्ता कमलासीद्धरिप्रिया ।। १

पूर्वमिन्द्रपदे राजन्नभिषिक्तः पुरन्दरः ।।
त्रैलोक्यैश्वर्यमासाद्य मेरुपृष्ठमुपाविशत् ।। २

तत्र विश्वावसुः प्राप्तस्तुम्बुरुश्च हाहाहुहू[1] : ।।
मेघनादः सुरानन्दी दुर्धरश्च बृहच्छ्रवाः ।। ३

एते चान्ये च बहवो गन्धर्वा मेरुमूर्धनि ।।
इन्द्रस्य पुरतो राजन् जगुः कलमतन्द्रिताः ।। ४

रम्भा तिलोत्तमा गौरी मेनकावपुरुर्वशी ।।
विश्वाची च घृताची च हरिणी पुंजकस्थला ।। ५

एताश्चाप्सरसो मुख्या ननृतुः सुरतुष्टिदम् ।।
प्रीयमाणेषु देवेषु संगीतकमहोत्सवे[2] ।। ६

तत्र शक्रश्रियं कृत्स्नं दृष्ट्वा[3] जलपद्मनाभि तुम्बुरुः ।। ७

-०-

२ नैष श्लोको ('श्री') प्रतौ
३ बी तत्र शक्रश्रियं दृष्ट्वाव हर्षात्तुम्बुरुरब्रवीत्
१ ए हहाहुहूः

तुम्बरु उवाच

त्वयि तिष्ठति देवेन्द्र देव श्री सर्वतोमुखी ॥
यया सकलमेतद्धि शोभते सुमण्डलम् ॥ ८

तवासन्सफला यज्ञास्तथासीत् सफलं तपः ॥
यस्मै लक्ष्मीप्रसादेन नमिष्यन्ति दिवौकसः ॥ ९

आदित्या वसवो रुद्राः सिद्धाः साध्यामरुद्गणाः ॥
गन्धर्वाप्सरसश्चैव सर्वे ऋषयस्तथा ॥ १०

राजानो मनुजाश्चैव ये च पातालवासिनः ॥
श्रिया विरहिताः सर्वे चेष्टन्ते तृणवद्भुवि ॥ ११

लक्ष्मीस्तपःफलं कृत्स्नं लक्ष्मीरध्वरसाधनम् ॥
लक्ष्मीरिन्द्रपदं लोके लक्ष्मीः साम्राज्यमद्भुतम् ॥ १२

देवो वा दानवो वापि सर्वश्चान्योपि वासव ॥
अवंलक्ष्मी विहीनोऽत्र त्याज्यः क्षारमिवोदकम् ॥ १३

-०-

१ बी-देवी श्री
२ बी-इवाम्बुधिः
३ र-क्षि

वसिष्ठ उवाच :- इत्याकर्ण्य स तद्वाक्यं सभायां त्रिदिवौकसाम् ।।
ऐश्वर्यमदमत्तो वै प्राह क्रुद्धः[1ए] सुरेश्वरः ।। १४

इन्द्र उवाच :- केयं लक्ष्मीरिह प्रोक्ता या ममालंकृतिर्भवेत् ।।
थिलत्य शशी वशात् प्राप्तमैन्द्रपदं मया ।। १५

तपोभिः[1] प्राप्यते लक्ष्मीर्येन केनापि तुम्बरे[2] ।।
सर्वस्यापि ततो लोके तपः परमिहोच्यते ।। १६

क्रोध्यैश्वर्यमासाद्य मयि लोकान् प्रशासति ।
स्तुतिरप्रस्तुता लक्ष्म्याः प्रोच्यते केन हेतुना ।। १७

इदमप्रस्तुतं प्रोक्तं सभायां मत्तां यतः ।।
ततः स्वर्गे प्रवेष्टव्यं न युष्माभिः कथंचन ।। १८

वसिष्ठ उवाच :- इत्युक्ते शतयज्ञेन हाहाकारो महानभूत् ।।
स्वं स्वं स्थानं ययुः सर्वे गर्हमाणाः सुरेश्वरम् ।। १९

तदिन्द्रपदसंभूतं यशः संयुमदाम[3]: ।।
शक्रस्तत्याज गन्धर्वान् जगतां दुःखहेतवे ।। २०

-०-०-

१ वी तपसा
२ वी तम्बुरा:
३ वी संचितमदाय:
१ ए क्रुधः

दर्पान्धस्य दुर्वासस्त्रे पश्यतां मरुतां पुरा ।
विषणांः पर्यपृच्छमौ शिरो राजन्निति श्रुतिः ।। २१

अथ स्वर्गविभ्रष्टास्ते गन्धर्वा दीनचेतसः ।।
परिम्लानमुखाः सर्वे लक्ष्मीं शरणमाव्रजन् ।। २२

देवीमाराधयामासुराहृताः स्वगीतिभिः ।।
अथ प्रत्यक्षतां प्राप्तां लक्ष्मीरित्याह तान् प्रति ।। २३

श्रीरुवाच :- किमिच्छथ[१ए] सुता यूयमिह मामुपसेव्य ह ।।
तद्ददामि न संदेहो ब्रूत[२ए] यद्यपि दुर्लभम् ।। २४

गन्धर्वा ऊचुः- मेरुपृष्ठे वयं देवि स्तुवानास्त्वां सुरेश्वरि ।।
शक्रेणोत्क्षेपितेन वयं स्वर्गाद्बहिष्कृताः ।। २५

स्थानं स्वर्गात्परं नास्ति वासायास्माकमिन्दिरे ।।
तेन त्वां शरणं प्राप्ताः प्रसीद हरिवल्लभे ।। २६

देव्युवाच :- गन्धर्वैरभ्यर्थ्य भाव्य[३ए] मधिशक्रात् सुरेश्वरात् ।।
इन्द्रोऽपि न विना युष्मान् स्वर्गं जातु प्रवेक्ष्यति ।। २७

-०-

१ ए त
२ ए ब्रूत
३ ए धि

वसिष्ठ उवाच :- इत्युक्तास्तेथ गन्धर्वाः श्रीचैत्रं तीर्थमाययुः ।।
किञ्चिज्जलाश्रयं प्राप्तास्तपस्तप्तुमतन्द्रिताः ।। २८

ततः क्रुद्धा सुरेशस्य देवी क्षीरोदसंभवा ।।
त्यक्त्वा त्रिभुवनं सर्वं जगाम भुवनेश्वरी ।। २९

पुष्करे पुण्डरीकस्य गर्भे लीनाभवत् क्षणात् ।।
अथाकुलमभूत् सर्वं स्वधास्वाहाविवर्जितम् ।। ३०

सीदन्ति भुवने धर्माः क्रियाः सर्वा जनेश्वर[1] ।
ततः स्वर्गात्परिभ्रष्टा देवाः क्षीणामहौजसः ।। ३१

विचरन्ति महीपाल देवीदर्शनकांक्षिणः ।।
श्रीमालं यावदायान्ति तावत्तत्रापि नास्ति सा ।। ३२

गतश्रीका निरानन्दा निरुत्साहा हतौजसः ।।
विशीर्णवदनाः सर्वे देवाचार्यमथाब्रुवन्[२ए] ।। ३३

देवाऊचुः परित्यक्तमिदं विश्वमासील्लक्ष्म्या निरुद्यमम् ।।
पश्य ज्ञानदशा ब्रुवन् वृच्याम: क्वाचिदिन्दिराम् ।। ३४

-०-०-

१ विशेष श्लोक - बी
~~१ ए ही २ ए ब्रुवन्~~

नष्टा यागादिकाः सर्वे विषयो विप्र वेश्मनि
निःस्वाध्याय मभूत् सर्वं स्वधा स्वाहाविवर्जितम् ।।
१ए - ही , २ए ब्रुवन्

वसिष्ठ उवाच :- इत्युक्तः स तदा देवैः क्षणामीलितलोचनः ।।
स्थित्वा गुरुर्वाचेदं प्रणतानमृताशनान् ।। ३५

बृहस्पति उवाच :- पुष्करे पुण्डरीकस्य कुहरेऽस्ति हरिप्रिया ।।
तत्र गच्छत संस्तूयं[1] तां प्रसादयत द्रुतम् ।। ३६

वसिष्ठ उवाच :- गुरोर्वाक्यमिदं श्रुत्वा सर्वे देवाः सवासवाः ।।
ययुः पुष्करं तीर्थं यत्र श्रीः कमलाश्रया ।। ३७

ब्रह्मादिभिः पुरा देवैर्निर्मितं तन्नरोत्तम[1] ।।
पुष्करं पुष्कराकीर्णं सरो द्वादशयोजनम् ।। ३८

सर्वे विलोकयांचक्रुस्ते कमलाकरम् ।।
माद्यान्सरोजालिरजःसुरभि तज्जलम् ।। ३९

तरलैः जलकल्लोलैर्नृत्यन्तमिव सर्वतः ।।
पक्षव्रातेन हंसानां चामरैरिव वीज्यते ।। ४०

अथ तत्र क्वचिद् भ्राम्यन् दीनचेताः सुरेश्वरः ।।
तडागे पद्मिनीपत्रसंवृते श्वेतपंकजे ।। ४१

-०-०-

१ बी- संस्तूय सम्प्रसादयत

१ ए-नवोत्तम

सुवर्णं इव धारावत् तेजोभिर्या न्यरोचत ।।
तत्र मेने श्रियं देवीं सर्वलोकार्तिहारिणी म् ।। ४२

ततो रोमाञ्चिततनुः प्रमोदभ्रमितेक्षणः ।।
तुष्टाव सहितो देवैर्देवी विश्वार्तिहारिणीम् ।। ४३

इन्द्र उवाच :- सर्वेश्वरि नमस्तुभ्यं जगतानन्ददायिनि ।।
१ ए
आर्तानां सह जन्तूनां-प्रसादसंमुखी भव ।। ४४

त्वद्विहीनमिदं सर्वं जगत् स्थावरजंगमम् ।।
ना शोभते क्वचित् मातश्चन्द्रहीनमिवाम्बरम् ।। ४५

धन्यास्ते कृतिनो देवि गृहे येषां च तिष्ठति ।।
मुक्तिमुक्तिप्रदा त्वं हि देवानामपि दुर्लभा ।। ४६

हरिवक्षःस्थले नित्यं स्थिता देवि विराजसे ।।
सात्त्विकी च स्थिता शक्तिसत्त्वाय शरीरिणाम् ।। ४७

१
तस्य माभूयेतिदारिद्र्यं स्वभावमलिनं क्वचित् ।।
२ए
यस्य हृत्कमलोत्संगे राजहंसीव तिष्ठसि ।। ४८

-०-०-

१ वी दारिद्र्यं न भवेदस्य क्वचित

१ ए जन्तुनां

२ ए ति

अशेषभुवनाधारो योगिध्येयो जनार्दनः ॥
अवतारान् करोत्येषः स्थित्यर्थं तव भूतले ॥ ४९

पृथिवी त्वं हरिर्व्योम विष्णु त्वं जलदोऽच्युतः ॥
त्वं नदी सागरः कृष्णा:[१९] बुद्धिस्त्वं केशवो मनः ॥ ५०

त्वयैतदखिलं देवि जातं ब्रह्माण्डमुत्तमम् ॥
कुंडलिन्यास्वरूपेण मृणालावलिलुलया ॥ ५१

स्तुतिरत्रास्तु कैवैव ब्रह्मणापि तवान्तिके ॥
यस्या हृदि जगन्नाथस्त्रैलोक्यशरणो हरिः ॥ ५२

नमोऽस्तु विश्वरूपिण्यै नमोऽस्तु सिन्धु संभवे ॥
जगद्धात्रि नमस्तुभ्यं नमस्ते विष्णुवल्लभे ॥ ५३

निःश्रीकमखिलं देवि विश्वमासीत् समन्ततः ॥
न स्वधा न तथा स्वाहा सीदामस्तनै वैष्णवि ॥ ५४

आर्तानामतिदीनानां मातः क्षीरोदसंभवे ॥
त्वां विना देवि देवानां परिक्षीणबलौजसाम् ॥ ५५

-०-

१९-ष्णा

२९-जगद्धात्रि

त्वमेव भव देवेशि शरणं नो यथा हरिः ॥

किचिंन् मया मदान्धेन गन्धर्वानि प्रतिमानितम् ॥ ५६

प्रायश्चित्तमनुष्ठस्य त्वद्गुणस्तवमिदं मम ॥ ५७

वसिष्ठ उवाच :- इत्थं लालप्यमानस्य दीनस्य च बिडौजसः ॥

प्रादुर्बभूव[1] कमलात् कमलाक्षी हरिप्रिया ॥

बिभ्रती कमले शुभ्रे पाणिभ्यामतुलद्युति : ॥ ५८

देव्युवाच :- वरं वरय देवेन्द्र परितुष्टास्मि ते ध्रुवम् ॥

पुनरीदृक् न कार्यं ते यथा त्वं कृतवान पुरा ॥ ५९

इन्द्र उवाच :- मातर्ममापराधोयं क्षन्तव्यः सततं त्वया ॥

न विप्रियकरीर्हि[2] स्याद् गुरूणां विकृतं मनः ॥ ६०

त्रैलोक्यं तु त्वया देवि न त्याज्यमिदमादरात् ॥

हिताय सर्वलोकानामेष मेऽस्तु वरः परः ॥ ६१

-०-

१ बी प्रादुर्बभूव तुष्टास्मि

२ बी न (वै) विप्रकृतैर्हिस्याद् गुरूणां

देव्युवाच :- एवमस्तु सुरश्रेष्ठ यथाभिलिषितं तव ॥
अहं तु कमलाज्जाता पुष्करे शक्रसंस्तुता ॥
तस्मान्मे कमला नाम लोके ख्यातिं गमिष्यति ॥ ६२

गन्धर्वेषु प्रसादस्ते कर्तव्यस्त्रिदिवेश्वर ॥
कृत्स्नानामपि लोकानामेते कल्याणभाषिणः ॥ ६३

वसिष्ठ उवाच :- इत्युक्त्वा सा तदा देवी कमला कमला मुदा ॥
संस्तूयमाना गन्धर्वैः श्रीमाले दोऽभ्यायया ॥ ६४

अभ्युत्थानं ततश्चक्रुर्द्विजाः श्रीमालवासिनः ॥
हर्षपर्याकुलैर्नेत्रैः पश्यन्तः कमलालयाम् ॥ ६५

अथ संस्तूय[1] तं देवीमग्निः सत्याभिराकुलाः ॥
बद्धाञ्जलिपुटाः सर्वे कमलामिदमब्रुवन् ॥ ६६

ब्राह्मणा ऊचुः विश्वमेतत् परित्यज्य गतायां त्वयि पुष्करम् ॥
तत्पं दारिद्र्यदुःखाभ्यामिदं कृच्छ्रेण[2] जीवति ॥ ६७

-०-

१ बी अथ संस्तूयते नित्यं देवी
१ ए कृत्स्नेण

स्थातव्यमिह देवेशि स्मरन्त्या प्राक् प्रतिश्रुतम् ।।
यथासीन्मे द्विजन्मान: सुखं विन्दन्ति सर्वत: ।। ६८

श्री उवाच :- श्रीमाले ऽहं निवत्स्यामि श्रीमालं दयितं मम ।।
१ए
श्रीमाल ये निवस्यन्ति ते भविष्यन्ति मे प्रिया: ।। ६९

वसिष्ठ उवाच :- इत्युक्त्वा ब्राह्मणान् देवी कमला कमलालया ।।
प्रीणनाय द्विजेन्द्राणामाकाशं समुपेतात ।। ७०

देवीविलोकनादेवजगर्ज जलदो महान् ।।
ततो वृष्टिरभूद्राजन् रत्नै: श्रीमालमन्तत: ।। ७१

प्रकीर्णा दीप्यमानभिर्मणिश्रेणिभिरुर्वरा ।।
रेजे सूर्यप्रभाजालै: तन्निवर्द्धेव सर्वत: ।। ७२

तथा रत्नैरभूदृष्टिस्तदा श्रीमालसीमनि ।।
यथा च क्वापि जन्तूनां न व्यथाभूत्तदद्भुतम् ।। ७३

ततो मुमुदिरेविप्रा: सर्वे श्रीमालवासिन: ।।
दृष्ट्वातं दौर्स्थ्यं सुदुर्वारिमवाप्तं हरिकान्तया ।। ७४

-o-

१ ए - वा

अथाभ्यर्च्य मनोभीष्टैः पुष्पधूपैरनेकशः[1] ।।
स्तुत्वा च कमलोद्भूतामिदमाहुस्तपस्विनः ।। ७५

ब्राह्मणा ऊचुः जय देवि प्रन्नार्तिमथिनि प्रमथाम्बिके ।।
संतुष्टाः स्मो वयं देवि कर्मणा तेन तेऽधुना ।। ७६

अहमत्र स्थिता नित्यमर्चनीया द्विजोत्तमैः ।।
स्तोतव्या च परं भक्त्या लब्धकामैरभीष्टदा ।। ७७

द्विजदारिद्र्यनाशाय रत्नवृष्टिः कृता मया ।।
ततो मे रत्नमालेति नाम विख्यातिमेष्यति ।। ७८

यो मामिह स्थितं भक्तवा पूजयिष्यति मानवः ।।
तस्याहं सकलान्कामान् प्रदास्यामि न संशयः ।। ७९

अद्य प्रभृति विप्राणां भूतलं खननामपि ।।
निर्गमिष्यन्ति रत्नानि वृत्तिस्तैरनुत्तमा ।। ८०

वसिष्ठ उवाच :- इत्युक्त्वा ब्राह्मणान् देवी देवैः परिवृता नृप ।।
जगामाकाशमाविश्य यत्र देवः स्वयं हरिः ।। ८१

-०-

१ ए °रनेकशः

पुनराप्यायितो लोक: प्रवृत्ताश्च महोत्सवा:
वंशेराप्यायिता देवा ववर्षु: प्रचुरं पय: ।। ८२

तत्रास्ते कुण्डमतुलं स्वच्छाम्बुपरिपूरितम् ।। ८३

तत्र स्नात्वा च पीत्वा च न नरो दुर्गतिं व्रजेत् ।। ८४

तत: प्रभृति भूपाल श्रीमाले कमलालया ।।
आस्ते पराशरेशस्य न दूरे पुण्यदा नृणाम् ।। ८५

एतं य: शृणुयान्नित्यं कमलाया: समुद्भवम् ।।
गृहे तस्य न दारिद्र्यं वर्षाणि क्वचन स्थितिम् ।। ८६

सैंहितायां

इति श्री स्कंद पुराणे एकाशिति साहस्र्यां तृतीय परिच्छेदे ब्राह्म विभागे श्रीमाल माहात्म्ये श्री कमला माहात्म्यं नाम द्विषष्ठितमोऽध्याय: ।। ६२ ।।

१ बी यज्ञैराप्यायिता देवा ववर्ष ।।
सीई ववृषु: